Date
15.07.2020

# Stutipraśastimañjarī (KS Sir)

Explanation :—

① आनन्दरामबरुवामहाभागाय प्रणतिः

विद्यायशोभिः परमाभिरामं
दिवंगतोऽप्यत्र विराजमानम् ।
यशः शरीरेण सुशोभनम्
आनन्दरामं पुरुषं महान्तम् ॥1॥ (2018)

⇒ अन्वयः→ विद्यायशोभिः परमाभिरामं, यशः शरीरेण सुशोभमानम्, दिवंगतः अपि अत्र विराजमानम् आनन्दरामं महान्तं पुरुषं (भक्त्या नियतं नमामि)।

सन्दर्भः→ पद्यमिदं मुकुन्द माधव शर्मणा विरचितायाः स्तुतिप्रशस्तिमञ्जर्याः "आनन्दरामबरुवामहाभागाय प्रणतिः" इति शीर्षकप्रशस्तेः समुद्धृतमस्ति। अत्र आनन्दरामबरुवामहोदयाय प्रणतिः निवेदिताऽस्ति।

व्याख्याः→ विद्यायशोभिः = विद्या च यशः च विद्यायशसी अथवा विद्याः च यशांसि च विद्यायशांसि तैः विद्यायशोभिः, ज्ञानेन सुकीर्त्या च, परमाभिरामं = परमश्चासौ अभिरामः परमाभिरामः, तं परमाभिरामं दृष्ट्या अत्यन्तं सुन्दरं, मनोरमम्, यशः = सुकीर्तिः तया अपि च शरीरेण = देहेन, सुशोभमानम् = देदीप्यमानम्, दिवंगतः = परलोकं गतः अपि, अत्र = अस्मिन् संसारे, विराजमानम् = विद्यमानम्, आनन्दरामम् = एतन्नामकं, महान्तं पुरुषं = पण्डि-

Date
15.07.2020

## स्तुतिप्रशस्तिमञ्जरी (KS Sir)

तत्प्रवरं भक्त्या = श्रद्धया, नियतं = सदैव अहं ग्रन्थकारः, नमामि = नमस्करोमि, प्रणतिं निवेदयामि।

छन्दः → पद्येऽस्मिन् उपजाति छन्दः वर्तते। तल्लक्षणं यथा —

अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम॥